**संस्कृत वार्ता:**

**दिनाङ्क : 20/05/2026**
**सायम् - 06:20**

## आदौ मुख्यवार्ता:

- प्रधानमन्त्री नरेन्द्रमोदी अद्य रोम्-नगरे इटली- देशस्य प्रधानमन्त्रिणा जार्जिया मेलोनी इत्यनया सह वार्तालापं कृतवान्; उभौ देशौ द्वैपाक्षिकसम्बन्धं विशेष-सामरिक-सहभागित्वेन उन्नतीकर्तुं निर्णयम् अकुर्वताम्।
- प्रधानमन्त्रिणा श्रीमोदिना उक्तं यत् उभौ देशौ भयोत्पादनं मानवतायै गम्भीरप्रतिरोधरूपेण पश्यतः।
- डी. आर्. डी. ओ. इति संघटनेन ड्रोन-प्रक्षेपितस्य मानवरहित-स्पष्टता-निर्देशित- प्रक्षेपास्त्रस्य परीक्षणं सम्पूरितं; रक्षामन्त्रिणा एतत् व्यूहात्मकं सोपानत्वेन वर्णितम्।
- सर्वोच्चन्यायालयेन केन्द्रस्य जातिगणनायाः निर्णयस्य विरोधे याचिका अस्वीकृतम्।
- आई. पी. एल. क्रिकेट्-क्रीडायाम्, ईडन्-गार्डन्स् इत्यत्र मुम्बई-इण्डियन्स-दलं कोलकाता-नाईट-राईडर्स-दलं सम्मुखी करिष्यति।

## अथ वार्ता: विस्तरेण

**प्रधानमंत्री-इटली**

प्रधानमन्त्री नरेन्द्रमोदी अद्य रोम्-नगरे इटली-देशस्य प्रधानमन्त्रिणा जार्जिया मेलोनी इत्यनया सह प्रतिनिधिस्तरीय-वार्ताम् अकरोत्, यस्य उद्देश्यं प्रमुखक्षेत्रेषु भारत-इटली-देशयोः द्वैपाक्षिक-सम्बन्धान् इतोप्यधिकं सुदृढं कर्तुं आसीत्। व्यापारस्य, निवेशस्य, तन्त्रज्ञानस्य, रक्षायाः, स्वच्छ-ऊर्जायाः, सामरिकसहभागित्वस्य च क्षेत्रेषु सहकारस्य सम्वर्धनम् एव अस्य सम्मेलनस्य केन्द्रबिन्दुः आसीत्।

उभौ नेतारौ परस्परहितस्य क्षेत्रीयस्य वैश्विकस्य च विकासेषु अपि चर्चितवन्तौ। भारत-इटली-देशयोः मध्ये चर्चायां प्रतिबिम्बितम् यत् वर्धमानं सामरिकसहभागित्वं, आर्थिकसहयोगस्य विस्ताराय, जनानां सम्बन्धेषु च महत्त्वं प्रदत्तम्। प्रतिनिधि-स्तरीया वार्तायाः अनन्तरं उभौ नेतारौ संयुक्तं वक्तव्यं प्रदत्तवन्तौ।

प्रधानमन्त्रिणा मोदिना घोषितं यत् भारत-इटली-देशयोः द्वैपाक्षिक-सम्बन्धं विशेष-सामरिक-सहभागित्वेन वर्धयितुं निर्णयः कृतः।

श्रीमोदी अवदत् यत् उभौ पक्षौ सहकारं वर्धयितुं विस्तृतं चर्चां कृतवन्तौ, भारत-इटली नवान्वेषणकेन्द्रस्य स्थापनार्थं च कार्यं कुर्वन्तौ स्तः। सः अवदत् यत् भारत-इटली-रक्षा-औद्योगिक-मार्गचित्रं सैन्य-उपकरणानां सह-विकासस्य सह-उत्पादनस्य च मार्गम् प्रशस्तम्।

प्रधानमंत्री अवदत् यत् उभौ देशौ नौवहनक्षेत्रेषु , पत्तनानाम् आधुनिकीकरणे, रसदक्षेत्रे, नील-अर्थव्यवस्थायां च मिलित्वा कार्यं करिष्यतः।

इटली-देशस्य प्रधानमन्त्री जार्जिया मेलोनी इत्येषा अवदत् यत् भारत-इटली-देशयोः सम्बन्धः विशेष-सामरिक-सहभागित्वरूपेण वर्धमानः अस्ति, अपि च द्वैपाक्षिक-सम्बन्धाः अधुना स्वस्य पूर्णक्षमतां साधयितुं समर्थाः सन्ति।

**प्रधानमंत्री संयुक्त लेख**

गतकेषुचित् वर्षेषु भारत-इटली-देशयोः मध्ये सम्बन्धाः अभूतपूर्वगत्या विस्तारिताः सन्ति, अधुना च निर्णायकं स्तरम् अवाप्नोत्। प्रधानमन्त्री नरेन्द्रमोदी तथा तस्य इटलीदेशीया समकक्षीया जार्जिया मेलोनी इत्युभाभ्यां लिखिते संयुक्तलेखे, उभयोः देशयोः मध्ये सम्बन्धः सौहार्दपूर्णस्नेहात् विशेष-सामरिकसहभागित्वेन विकसितः अस्ति, यस्याधारः स्वातन्त्र्यस्य, लोकतन्त्रस्य, भविष्यस्य कृते संयुक्तदृष्ट्याधारित मूल्येषु च निहितास्तीति उभौ नेतारौ प्रकाशितवन्तौ। नेतारौ उक्तवन्तौ यत् यदा वैश्विकव्यवस्थायां गहनपरिवर्तनं प्रचलति, तदा भारत-इटली-सहभागित्वम् उच्चतम-राजनैतिक-संस्थागतस्तरेषु नियमित-आदानप्रदानद्वारा दर्शितम् अस्ति। एकविंश्यां शताब्द्यां समृद्धिः सुरक्षां च राष्ट्राणाम् नूतनाशयस्य, ऊर्जा-परिवर्तनस्य प्रबन्धनस्य, सामरिक-सार्वभौमत्वस्य सुदृढीकरणस्य च क्षमतायाः उपरि परस्परसमन्वयं प्रतिबिम्बयति इति उभौ उक्तवन्तौ।

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।**

**डीआरडीओ**

रक्षानुसंधान विकास संघटनेन डी. आर. डी. ओ. इत्यनेन देशस्य रक्षाक्षेत्राय एकं महत्वपूर्णोपलक्ष्यं साधितम्, यस्मिन् मानवरहितं वायुयानेन प्रक्षेपितं सटीक निर्देशित वी3 प्रक्षेपास्त्रस्य अंतिम विकास परीक्षणानां सफलतया सम्पादितम्। आन्ध्रप्रदेशे कुर्नूलस्य समीपे डी. आर्. डी. ओ. परीक्षणपरिधिमध्ये परीक्षणं जातम्। रक्षामंत्री राजनाथसिंहः डी. आर्. डी. ओ.-संस्थायाः अभिनन्दनं कृत्वा, रक्षाक्षेत्रे स्वावलंबनार्थं प्राप्तं व्यूहात्मकं सोपानम् इति वर्णितवान्।

**राजनाथ कोरिया**

रक्षामंत्री राजनाथसिंहः अद्य सियोल-नगरे दक्षिणकोरिया-देशस्य रक्षा-अधिग्रहण-कार्यक्रम-प्रशासनस्य मन्त्रिणा ली योङ्ग-चुल इत्यनेन सह मिलितवान्। एकस्मिन् सामाजिकान्तर्जालीये संदेशे, श्री सिङ्घः अवदत् यत् उपवेशने उभौ पक्षौ संयुक्त-विकासस्य, संयुक्त-उत्पादस्य, संयुक्त-निर्यातस्य च मार्गाणां निर्माणार्थं सहभागि-प्रयासानां उपयोगाय सहमतिं प्रकटितवन्तौ। सः अग्रे अवदत् यत् द्वयोः देशयोः नवान्वेषणव्यवस्थायाः समन्वयार्थं महत्त्वाकांक्षी काइण्ड-ऐक्स् उपक्रमस्य सम्भावनायाः उद्घाटनस्य मार्गचित्रस्य विषये अपि विचारः अभवत्।

**सर्वोच्चन्यायालय-जातिगणना**

सर्वोच्चन्यायालयेन अद्य आगामि जनगणनायां जातिगणनां कर्तुं केन्द्रस्य निर्णयस्य विरोधे याचिका अस्वीकृतम् , उक्तं च यत् अयं विषयः सर्वकारस्य नीतिक्षेत्रस्य अन्तर्गतम् आयाति। मुख्यन्यायाधीशस्य सूर्यकान्तस्य नेतृत्वे पीठेन उक्तं यत्, सर्वकारेण तेषां कृते कल्याणकारी-उपायान् कल्पयितुं, अनुन्नतवर्गेण सम्बद्धानां जनानां सङ्ख्या अवश्यमेव ज्ञातव्या। न्यायपीठेन उक्तं यत् एतादृशं दत्तांश-सङ्ग्रहणे किमपि अनुचितं नास्ति तथा च विषयेस्मिन् हस्तक्षेपं कर्तुं निराकृतम्।

**गड्करी-हिन्दीभाषा**

केन्द्रीय-मार्ग-परिवहन-राजमार्ग-मन्त्रिणा नितिन् गड्करी वर्येण अद्य नवदिल्ल्यां मन्त्रालयस्य हिन्दी-परामर्श-समितेः सभायाः अध्यक्षता कृता। सामाजिकान्तर्जालीये पटले लिखिते लेखे श्री. गड्करी वर्यः अवदत् यत् हिन्दी केवलं भाषा न अस्ति सा तु

राष्ट्रस्य एकीकरणस्य प्रबलमाध्यमरूपेण कार्यं करोति। केन्द्रीयमन्त्रिणा उक्तं यत् मन्त्रालयस्य अधिकतमं कार्यं हिन्दीभाषायां एव भवेत् इति सुनिश्चितं कर्तुं तस्य प्रयासः अस्ति।

**ऋतु विभाग:**

भारत-ऋतु-विभागेन अस्मिन् सप्ताहे उत्तरपश्चिम-भारते तथा मध्यभारते तीव्रतर-उष्णतरङ्गस्य स्थितेः संभावना प्रकटिता अस्ति। आई एम डी इत्यस्य अनुसारम् आगामिषु चतुर्षु दिनेषु दिल्ली-पञ्जाब्-हरियाणा-चण्डीगढ-ओडिशा-छत्तीसगढ-राजस्थान-तेलङ्गाना-उत्तराखण्ड्-इत्येतेषु प्रदेशेषु उष्णतरङ्गस्य स्थितिः भवितुम् अर्हति। अत्रान्तरे, असम्-मेघालय-केरलम्-माहे-उपहिमालयीय-पश्चिमबङ्गाल-सिक्किम्-तमिलनाडु-पुदुचेरी-करैक्कल्-अण्डमान्-निकोबार्-द्वीप समुहेषु च श्वः यावत् प्रचण्डवृष्टेः अपेक्षास्ति।

**आई. पी. एल**

आई. पी. एल. क्रिकेट्-क्रीडायां कोलकाता-नाईट-राईडर्स्-दलं, कोलकाता-नगरस्य ईडन-गार्डन्स् इत्यत्र मुम्बई-इण्डियन्स् दलं सम्मुखी करिष्यति । प्रतियोगितायाः आरम्भः सायं सार्द्ध सप्तवादने भविष्यति। राजस्थान-रायल्स-दलेन गतरात्रौ जयपुरे लखनऊ-सुपर-जायण्ट्स-दलं सप्त स्तोभैः पराजितम्।

**॥ इति वार्ता: ॥**